# विभक्तिः अभ्यासपत्राणि

## १७ – १६.०४.२०१६

व्योम-संस्कृत-पाठशाला

www.sanskritfromhome.in

# अभ्यासः – १

## पञ्चमीविभक्ति-एकवचनरूपं वदत

- बालः
- आपणः
- देवः
- मित्रम्
- राष्ट्रम्
- गृहम्

- बालिका
- महिला
- रमा
- सीता
- गिरिजा
- शाला

- नारी
- गौरी
- गोपी
- नदी
- माधवी
- वाणी

# अभ्यासः – १ - उत्तराणि

## पञ्चमीविभक्ति-एकवचनरूपं वदत

- बालः - बालात्
- आपणः - आपणात्
- देवः - देवात्
- मित्रम् - मित्रात्
- राष्ट्रम् - राष्ट्रात्
- गृहम् - गृहात्
- बालिका - बालिकायाः
- महिला - महिलायाः
- रमा - रमायाः
- सीता - सीतायाः
- गिरिजा - गिरिजायाः
- शाला - शालायाः
- नारी - नार्याः
- गौरी - गौर्याः
- गोपी - गोप्याः
- नदी - नद्याः
- माधवी - माधव्याः
- वाणी - वाण्याः

# अभ्यासः-२

## कुतः आगच्छति?



# अभ्यासः-२ - उत्तराणि
# कुतः आगच्छति?

- ग्रामात् आगच्छति।
- नगर्याः आगच्छति।
- शालायाः आगच्छति।
- गृहात् आगच्छति।
- ग्रन्थालयात् आगच्छति।
- लङ्कायाः आगच्छति।
- काश्याः आगच्छति।
- मन्दिरात् आगच्छति।

# अभ्यासः – ३

# कस्मात् कुत्र गच्छति?

- बालः - गृहम् -> शाला -> क्रीडाङ्गणम् -> आपणः -> प्रदर्शिनी -> गृहम्
- रमेशः – राजस्थानम् -> देहली -> हिमाचलप्रदेशः -> काश्मीरम् -> कन्याकुमारी
- गिरिजा – अयोध्या -> मथुरा -> काशी -> पुरी -> प्रयागः -> पाटलीपुत्रम्
- वसुधा – भारतम् -> श्रीलङ्का -> लक्षद्वीपः -> ब्रह्मदेशः -> अमेरिका -> सिंहपुरी -> भारतम्

# अभ्यासः – ३ - उत्तराणि

# कस्मात् कुत्र गच्छति?

- बालः गृहात् शालां गच्छति। शालायाः क्रीडाङ्गणं गच्छति। क्रीडाङ्गणात् आपणं गच्छति। आपणात् प्रदर्शिनीं गच्छति। प्रदर्शिन्याः गृहं गच्छति।
- रमेशः राजस्थानात् देहलीं गच्छति। देहल्याः हिमाचलप्रदेशं गच्छति। हिमाचलप्रदेशात् काश्मीरं गच्छति। काश्मीरात् कन्याकुमारीं गच्छति।
- गिरिजा अयोध्यायाः मथुरां गच्छति। मथुरायाः काशीं गच्छति। काश्याः पुरीं गच्छति। पुर्याः प्रयागं गच्छति। प्रयागात् पाटलीपुत्रं गच्छति।
- वसुधा भारतात् श्रीलङ्कां गच्छति। श्रीलङ्कायाः लक्षद्वीपं गच्छति। लक्षद्वीपात् ब्रह्मदेशं गच्छति। ब्रह्मदेशात् अमेरिकां गच्छति। अमेरिकायाः सिंहपुरीं गच्छति। सिंहपुर्याः भारतं गच्छति।

# अभ्यासः - ४

# कुतः किं पतति?

- वृक्षः – फलम्
- आकाशः – तोयम्
- स्वर्गः – पुष्पाणि
- हस्तः – पुस्तकम्
- नेत्रम् – अश्रूणि
- अङ्गुली – अङ्गुलीयकम्
- मस्तकम् – केशाः
- शाखा – पर्णानि
- अश्वः – योधः
- निश्रेणी – बालः
- दोला – बाला
- उल्का - शिलाखण्डाः

# अभ्यासः – ४ - उत्तराणि

# कुतः किं पततिं?

- वृक्षात् फलं पतति।
- आकाशात् तोयं पतति।
- स्वर्गात् पुष्पाणि पतन्ति।
- हस्तात् पुस्तकं पतति।
- नेत्रात् अश्रूणि पतन्ति।
- अङ्गुल्याः अङ्गुलीयकं पतति।
- मस्तकात् केशाः पतन्ति।
- शाखायाः पर्णानि पतन्ति।
- अश्वात् योधः पतति।
- निश्रेण्याः बालः पतति।
- दोलायाः बाला पतति।
- उल्कायाः शिलाखण्डाः पतन्ति।

# अभ्यासः – ६

## कस्मात् किम् आनयति(सर्वेषु वचनेषु)

वस्तूनि

आपणः

सस्यानि वनम्

ग्रामः फलानि

पुष्पाणि उद्यानम्

बालकः

देवालयः प्रसादः

जलम् तीर्थम्

ग्रन्थालयः पुस्तकानि

नगरम्

वस्त्राणि

# अभ्यासः – ६ - उत्तराणि

## कस्मात् किम् आनयति(सर्वेषु वचनेषु)

- आपणात् वस्तूनि आनयति।
- ग्रामात् फलानि आनयति।
- देवालयात् प्रसादम् आनयति।
- ग्रन्थालयात् पुस्तकानि आनयति।
- नगरात् वस्त्राणि आनयति।
- तीर्थात् जलम् आनयति।
- उद्यानात् पुष्पाणि आनयति।
- वनात् सस्यानि आनयति।

# अभ्यासः – ७

## कस्मात् किं स्वीकरोति (सर्वेषु वचनेषु)

पुष्प

बालिका

फल तापसी

अग्रजा शाटिका

रमा

लेखनी सहोदरी

अनुजा पुस्तिका

घट गोपी

वृद्धा स्यूत

कर्मकरी

मार्जनी

# अभ्यासः – ७ - उत्तराणि

## कस्मात् किं स्वीकरोति (सर्वेषु वचनेषु)

- रमा बालिकायाः/बालिकाभ्याम्/बालिकाभ्यः पुष्पाणि स्वीकरोति।
- रमा अग्रजायाः/अग्रजाभ्याम्/अग्रजाभ्यः शाटिकाः स्वीकरोति।
- रमा अनुजायाः/अनुजाभ्याम्/अनुजाभ्यः पुस्तिकाः स्वीकरोति।
- रमा वृद्धायाः/वृद्धाभ्याम्/वृद्धाभ्यः स्यूतान् स्वीकरोति।
- रमा कर्मकर्याः/कर्मकरीभ्याम्/कर्मकरीभ्यः मार्जनीः स्वीकरोति।
- रमा गोप्याः/गोपीभ्याम्/गोपीभ्यः घटान् स्वीकरोति।
- रमा सहोदर्याः/सहोदरीभ्याम्/सहोदरीभ्यः लेखनीः स्वीकरोति।
- रमा तापस्याः/तापसीभ्याम्/तापसीभ्यः फलानि स्वीकरोति।

# अभ्यासः – ८

## बालकः कस्मात् भीतः?




व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ८ - उत्तराणि

## बालकः कस्मात् भीतः?

- सिंहात् भीतः।
- मित्रात् भीतः।
- सूच्याः भीतः।
- परीक्षायाः भीतः।
- शालायाः भीतः।
- जनकात् भीतः।
- पितामह्याः भीतः।
- वैफल्यात् भीतः।

# अभ्यासः – ९

## केभ्यः भयम्?




व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ९ - उत्तराणि

## केभ्यः भयम्?

- चोरेभ्यः भयम्।
- नारीभ्यः भयम्।
- मित्रेभ्यः भयम्।
- परीक्षाभ्यः भयम्।
- राक्षसीभ्यः भयम्।
- सर्पेभ्यः भयम्।
- औषधेभ्यः भयम्।
- छुरिकाभ्यः भयम्।